HYENA, *s.* तरक्षुः *m.*, तरक्षुकः, तरक्षः, तर्क्षुः *m.*, मृगाजीवः, मृगादनः, युयुक्खुरः.

HYGROMETER, *s.* क्लेदपरिमापकयन्त्रं, तेमपरिमापकः.

HYMEN, *s.* विवाहाधिष्ठात्री देवता, विवाहाधिष्ठाता *m.* (तृ).

HYMENEAL, *a.* वैवाहिकः -की -कं, विवाहीयः -या -यं, उद्वाहिकः -की -कं, पाणिग्रहणिकः -की -कं.

HYMN, *s.* स्तुतिगीतं, ईश्वरस्तुतिगीतं, स्तुतिगानं, गीतं, सङ्गीतं, गानं, भक्तिगानं, गाथा, गेयं, खेलिः *f.*, स्तोत्रं, सूक्तं; 'a chanter of hymns,' सुम्नयुः *m.*, गायकः, उद्गाता *m.* (तृ).

*To* HYMN, *v. a.* (Celebrate in song) सङ्गीतद्वारेण स्तु (c. 2. स्तौति, स्तोतुं) or स्तुतिं कृ or प्रशंस् (c. 1. -शंसति -सितुं), उपवीण (nom. उपवीणयति -यितुं).

*To* HYMN, *v. n.* गै (c. 1. गायति, गातुं), उद्गै, प्रगै, सुम्न (nom. सुम्नायते), स्तुतिं पठ् (c. 1. पठति -ठितुं), स्तुतिपाठं कृ.

HYMNED, *p. p.* उपगीतः -ता -तं, उपगीयमानः -ना -नं, स्तुतः -ता -तं, संस्तुतः -ता -तं, स्तूयमानः -ना -नं.

HYP, *s.* विषादः, अवसादः, अवसन्नता, उद्वेगः, ग्लानिः *f.*, खेदः.

*To* HYP, *v. a.* विषद् (c. 10.-षादयति -यितुं), विषण्णीकृ, ग्लानीकृ, उद्विग्नीकृ.

HYPERBOLE, *s.* अत्युक्तिः *f.*, अतिशयोक्तिः *f.*, चित्रोक्तिः *f.*, अधिकोक्तिः *f.*, आधिक्यं, वागाधिक्यं, वागुपचयः, वाक्यबाहुल्यं, अतिवर्णना, सत्यातिक्रमः, याथार्थ्यातिक्रमः, यथार्थोल्लङ्घनं, सत्यातिरिक्ता कथा.

HYPERBOLIC, HYPERBOLICAL, *a.* अत्युक्तिपूर्व्वः -र्व्वा -र्व्वं, अत्युक्तिमान् -मती -मत् (त्), अधिकः -का -कं, अधिकवाङ्मयः -यी -यं, अतिक्रान्तसत्यः -त्या -त्यं, उल्लङ्घितसत्यः -त्या -त्यं.

HYPERBOLICALLY, *adv.* अत्युक्त्या, अत्युक्तिपूर्व्वं, अतिशयोक्त्या, सत्यातिक्रमेण.

*To* HYPERBOLIZE, *v. n.* अत्युक्तिं कृ, अतिशयोक्तिं कृ, अतिवर्णनं कृ, अतिशयोक्त्या वद् (c. 1. वदति -दितुं).

HYPERBOREAN, *a.* उत्तरः -रा -रं, उत्तरदिश्यः -श्या -श्यं, उत्तरीयः -या -यं, उदङ् -दीची -दक् (च्), उदीचीनः -ना -नं, उत्तरदिक्सम्बन्धी -न्धिनी -न्धि (न्); 'a hyperborean,' उत्तरदेशजः.

HYPERCRITIC, *s.* अतिशयेन गुणदोषपरीक्षकः, एकान्ततो गुणदोषनिरूपकः or दोषग्राही *m.* (न्), वितण्डकः.

HYPERCRITICISM, *s.* अतिशयेन गुणदोषपरीक्षा or गुणदोषनिरूपणं, वितण्डा, अतिवितण्डा.

HYPHEN, *s.* सम्बन्धचिह्नं, संयोगचिह्नं, सम्बन्धसूचकं चिह्नं or अङ्कः.

HYPOCHONDRES, HYPOCHONDRIA, *s.* कुपितवायुः *m.*, वायुरोगः, विषादः, विषण्णता, अवसादः, उद्वेगः.

HYPOCHONDRIAC, HYPOCHONDRIACAL, *a.* कुपितवायुग्रस्तः -स्ता -स्तं, विषादी -दिनी -दि (न्), विषण्णः -ण्णा -ण्णं, अन्तर्मनाः -नाः -नः (स्), चिन्ताकुलः -ला -लं, उद्विग्नः -ग्ना -ग्नं.

HYPOCRISY, *s.* कुहना -निका, दम्भः, कुहकवृत्तिः *f.*, धर्म्मोपधा, मिथ्याधर्म्मः -र्म्मत्वं, कपटधर्म्मः, धर्म्मविषये छद्म *n.* (न्), छद्मवेशः or कापट्यं, कुक्कुटिः *f.* -टी, काल्पनिकता, धर्म्मध्वजमात्रं, आर्य्यरूपता, आर्य्यवेशधारणं, मक्षः, म्रक्षः.

HYPOCRITE, *s.* दम्भी *m.* (न्), दाम्भिकः, कुहकः, कुहकवृत्तिः *m.*, कपटधर्म्मी *m.* (न्), कपटी *m.* (न्), आर्य्यवेशधारी *m.* (न्), वेशधारी *m.*, धर्म्मध्वजी *m.* (न्), आर्य्यरूपः, आर्य्यलिङ्गी *m.* (न्), छद्मतापसः, कपटतपस्वी *m.* (न्), कपटव्रती *m.* (न्), लिङ्गवृत्तिः *m.*, छद्मवेशी *m.* (न्), कपटवेशी *m.* (न्), वकव्रती *m.* (न्), वैडालव्रतिकः, कौक्कुटिकः, कुयोगी *m.* (न्), छन्दपातनः, लोकरञ्जनार्थम् आर्य्यकर्म्मानुष्ठायी *m.* (न्), साधुम्मन्यः.

HYPOCRITICAL, *a.* दाम्भिकः -की -कं, दम्भी -म्भिनी -म्भि (न्), कुहनः -ना -नं, कपटी -टिनी -टि (न्), कापटिकः -की -कं, छद्मवेशी -शिनी -शि (न्), छाद्मिकः -की -कं, धर्म्मोपधः -धा -धं, काल्पनिकः -की -कं.

HYPOCRITICALLY, *adv.* कुहकवत्, दाम्भिकवत्, सदम्भं, सकपटं, मिथ्याधर्म्मेण.

HYPOGASTRIC, *a.* वास्तेयः -यी -यं; 'hypogastric region,' वस्तिः *m.f.*

HYPOTHENUSE, *s.* कर्णः, विषमकर्णः.

HYPOTHESIS, *s.* उपन्यासः, प्रतिज्ञा, कल्पना, प्रमेयं, निष्प्रमाणेन उपन्यासः अप्रमाणपूर्व्व उपन्यासः, अनुमानं, अनुभवः.

HYPOTHETIC, HYPOTHETICAL, *a.* अप्रमाणपूर्व्वम् उपन्यस्तः -स्ता -स्तं, आनुमानिकः -की -कं, काल्पनिकः -की -कं, सोपन्यासः -सा -सं, निष्प्रमाणः -णा -णं.

HYPOTHETICALLY, *adv.* उपन्यासक्रमेण, प्रतिज्ञाक्रमेण, सोपन्यासं, निष्प्रमाणेन.

HYSSOP, *s.* हिस्सपसंज्ञकः कटुरसविशिष्ट ओषधिभेदः.

HYSTERIC, HYSTERICAL, *a.* मूर्च्छालः -ला -लं, मूर्च्छावान् -वती -वत् (त्), गर्भरोगोपहतत्वाद् मूर्च्छाग्रस्तः -स्ता -स्तं, मूर्च्छनोपहतः -ता -तं.

HYSTERICS, *s.* जरायुरोगजाता मूर्च्छना or मूर्च्छा, गर्भरोगजात उपसर्गः or आवेशः.

## I.

I, *pron.* अहम् (अस्मद्); 'I myself,' सो ऽहं.

IAMBIC, *s.* द्व्यक्षं, द्व्यक्षरं पदं यस्य पूर्व्वाक्षरं लघु पश्चिमाक्षरं गुरु.

IBEX, *s.* पर्व्वतवासी छागभेदः, अजः, वस्तः, पर्णभोजनः.

IBIS, *s.* पूर्व्वं मिसरदेशे महापूजापुरःसरं पालितः पक्षिभेदः.

ICE, *s.* हिमं, हिमानी, हिमसंहतिः *f.*, हिमसंहतम् उदकं, शीतमुदकं, घनजलं, संहतजलं, घनीकृतजलं, तुषारः, नीहारः, प्रालेयं, अवश्यायः.

*To* ICE, *v. a.* हिमीकृ, तुषारीकृ, हिमरूपं -पां -पं कृ.—(Cool with ice) हिमद्वारेण or तुषारद्वारेण शीतलीकृ or शिशिरीकृ or शीतल (nom. शीतलयति -यितुं).

ICEBERG, *s.* हिमपर्व्वतः, हिमराशिः *m.*, तुषारपर्व्वतः, तुषारराशिः *m.*, घनजलराशिः.

ICE-BOUND, *a.* हिमबद्धः -द्धा -द्धं, हिमपरिवेष्टितः -ता -तं.

ICE-HOUSE, *s.* ग्रीष्मकाले हिमरक्षणयोग्यं गृहं, हिमगृहं, हिमगुप्तिः *f.*

ICHNEUMON, *s.* अङ्गूषः, नकुलः, बभ्रुः *m.*

ICHOR, *s.* पूयरक्तं, पूयशोणितं.

ICHTHYOLOGY, *s.* मत्स्यविद्या, मत्स्यजातिगुणादिविषया विद्या.

ICHTHYOSAURUS, *s.* मत्स्यमकरः.

ICICLE, *s.* हिमकणः -णिका, तुषारकणः, नीहारकणः, हिमबिन्दुः *m.*

ICINESS, *s.* हिमता, हिम्यता, हिमवत्त्वं, हैमता, हैमं, शीतता, शैत्यं.

ICONOCLASM, *s.* देवताप्रतिमाभङ्गः, देवतामूर्त्तिभञ्जनं.

ICONOCLAST, *s.* देवताप्रतिमाभञ्जकः, देवतामूर्त्तिभङ्गकरः.

ICONOGRAPHY, *s.* प्रतिमालिखनं, मूर्त्तिविवरणं, प्रतिमूर्त्तिव्याख्या.

ICONOLOGY, *s.* प्रतिमाविद्या, देवतादिप्रतिमानविषया विद्या.

ICY, *a.* हिमः -मा -मं, हिम्यः -म्या -म्यं, हैमः -मी -मं, हिमवान् -वती -वत् (त्), तुषारवान् &c., तौषारः -री -रं, नीहारवान् &c.—(Frigid) शीतः -ता -तं, शीतलः -ला -लं, शिशिरः -रा -रं, जडः -डा -डं.—(Wanting in affection) निःस्नेहः -हा -हं, स्नेहशून्यः -न्या -न्यं.

IDEA, *s.* बुद्धिः *f.*, मतिः *f.*, सङ्कल्पः, मनोगतं, मनसिजं, चिन्ता, मनःकल्पितं, मनःकल्पना, कल्पना, वासना, भावना, बोधः; 'with the idea that,' 'under the idea of,' is expressed by the inst. c. of बुद्धिः; as, 'with the idea that he was a tiger,' व्याघ्रबुद्ध्या; 'with the idea of reaching,' प्रापणबुद्ध्या; 'from an idea of (his) incapacity,' अपात्रबुद्ध्या.—(Abstract idea) भावः.

IDEAL, *a.* मनसिजः -जा -जं, मनोगतः -ता -तं, मनोजः -जा -जं, मानसिकः